- Title – अमरकोश
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 1-29 पत्र 58 पृष्ठ
- Lines-
- Size
- Substance Paper –
- Script Devanagari – देवनागरी
- Language – संस्कृत
- Period –
- Beginning – श्री गणेशाय नमः यस्य ज्ञानदयासिंधोरगाध स्यानघा
- End – प्रेम्णाश्लाघा नाम अस्त्रीचाटुश्चटु श्लाघाप्रेम्णा मिथ्याविः
- Colophon-
- Illustrations -
- Source -
- Subject - कोशग्रन्थ
- Revisor -
- Author - श्री अमरसिंह
- Remarks-

①

०१०

४१५

अमर कोश:

दाता- श्री शिवशंकर शर्मा, कॉलेज स्वामी प्रेस, मेरठ

श्री गणेशाय नमः

यस्य ज्ञानदयासिंधोरगाधस्यानघा गुणाः ॥ सेव्यतामक्षयो धीराः स श्रिये चामृताय च ॥ १ ॥ समाहृत्यान्यतंत्राणि संक्षिप्तैः प्रतिसंस्कृतैः ॥ संपूर्णमुच्यते वर्गैर्नामलिंगानुशासनं ॥ २ ॥ प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित् ॥ स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित् ॥ ३ ॥ भेदाख्यानाय न द्वंद्वो नैकशेषो न संकरः ॥ कृतोऽत्र भिन्नलिंगानामनुक्तानां क्रमादृते ॥ ४ ॥

अमरकोश १ (margin)

सानं व दयाप्रि... अनलस्य शस्य ... (interlinear glosses, partly illegible)

ऋमं विना लिंगानां विज्ञानं ... कर्तव्यं ... किन्तु स्त्रीपुंनपुंसकानि क्रमेणापठितानि यथा स्तवः स्तोत्रं स्तुतिर्नुतिरिति न तु स्तुतिः स्तोत्रं स्तवो नुतिः

3

स्वर्गनाम नवनामानि स्वर्गस्य

त्रिलिंग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति निषिद्धलिंगं शे
षार्थं त्वंताथादि न पूर्वभाक् ५ स्वर व्ययं स्वर्गनाकत्रिदिवत्रि

षड्विंशति देवानाम

दशालयाः सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपं ६ अम

देवनाम

रा निर्जरा देवास्त्रिदशा विबुधाः सुराः सुपर्वाणः सुमनसस्त्रिदि
वेशा दिवौकसः ७ आदितेया दिविषदो लेखा अदितिनंदनाः आ
दित्या ऋभवोऽस्वप्ना अमर्त्या अमृतांधसः ८ बर्हिर्मुखाः क्रतु

आदित्या द्वादश प्रोक्ता विश्वेदेवा दश स्मृताः॥ वसवश्चाष्ट विख्याताः षट्त्रिंशत् तुषिता मताः। आभास्वराश्चतुःषष्टिर्वाताः पंचाशदूनकाः॥ महाराजिकनामानो द्वे शते विंशतिस्तथा॥२॥ साध्या द्वादश विख्याता रुद्राश्चैकादश स्मृताः॥ ना॰२

स्व॰को॰ भुजो गीर्वाणा दानवारयः। वृंदारका देवतानि पुंसि वा देवताः स्त्रि- २६ ५

गणदेवतानाम् = नव देवानाम्

२ यां॥ आदित्यविश्ववसवस्तुषिताभास्वरानिलाः। महाराजिक-

३६ ५५ ६४ ४९ २२०

१२ ११ श्रीमत्ववाति नाम्ना विद्याधरोऽकेना॰ देनागना॰ कुबेरदयः मायाविनो लंकोदि वासिनः गंध

साध्याश्च रुद्राश्च गणादेवताः॥ १० विद्याधराप्सरोयक्षरक्षोगंधर्व-

१० देवयना॰

किन्नराः। पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः॥ ११ अ- राम

सुरा दैत्यदैतेयदनुजेंद्रारिदानवाः। शुक्रशिष्या दितिसुताः २

१० जिनदेवनाना

पूर्वदेवाः सुरद्विषः॥ १२ सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः। समंत-

दशवलानियस्पसदशवलः दानंशीलंक्षमावीर्यंध्यानप्रज्ञावलानिच॥ उपायःप्रणिधिर्ज्ञानंदशबुद्धवलानिचोतं.

द्वौभगवान्मारजिल्लोकजिज्जिनः१३ षडभिज्ञोदशवलोऽद्वयवादी
विनायकः मुनींद्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तुयः१४स
शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्चसः गौतमश्चार्कबंधु
श्चमायादेवीसुतश्चसः२५ ब्रह्मात्मभूःसुरज्येष्ठःपरमेष्ठीपिताम
हः हिरण्यगर्भोलोकेशःस्वयंभूश्चतुराननः२६ धाताब्जयोनि
लोकेशः

"आत्मभूः सुरज्येष्ठः परमेष्ठी पितामहः कमलोद्भवः ॥ सदानंदो रजोमूर्तिः सत्यको हंसवाहनः इत्यादयः

"द्रुघणः" "विरिंचः" विरिंचो विरंचः कमलासनः

6

म्र· कोद्रुहिणो विरिंचिः कमलासनः स्रष्टाप्रजापतिर्वेधा विधाता विश्व

३ सृड्विधिः २७ विष्णुर्नारायणः कृष्णो वैकुंठो विष्टरश्रवाः दामो

दरो हृषीकेशः केशवो माधवः स्वभूः २८ दैत्यारिः पुंडरी

काक्षो गोविंदो गरुडध्वजः पीतांबरोऽच्युतः शार्ङ्गी विष्वक्सेनो राम·

जनार्दनः २९ उपेंद्र इंद्रावरजश्चक्रपाणिश्चतुर्भुजः पद्मना २

"सौरिः

भीमधुरिपुः वासुदेवस्त्रिविक्रमः २० देवकीनंदनः शौरिः श्रीप
तिः पुरुषोत्तमः वनमालीवलिध्वंसी कंसारातिरधोक्षजः २१ वि

श्रीवत्सः श्रीवत्सः केशावर्त्तविशेषः लांछनं चिह्नं यस्य

श्वंभरः कैटभजिद्विधुः श्रीवत्सलांछनः पुराणपुरुषोयं पुरु

षट्चत्वारिंशत्क्षितिः

षोनरकांतकः २२ जलशायी विश्वरूपो मुकुंदो मरमर्द्दनः मु
रारिः केशिदमनोऽरिष्टहा कालियांतकः विश्वस्तङ्गिश्वना

7

8

अ॰को॰ भश्ववत्सपाणिशार्गंदाधरः हरीराहुशिरश्छेदी यादवानांपतिः प्र

४ भुः २६ दशावतारोविश्वात्माश्चादिदेवोमहीधरः वसुदेवोस्य

जनकः सत्यवानकदुंदुभिः २७ वलभद्रःप्रलंवघ्नोवलदेवो

च्युताग्रजः रेवतीरमणोरामः कामपालोहलायुधः २८ नील राम॰

लांवरोरौहिणेयस्तालांकोमुसलीहली संकर्षणः सीर ४

"५"

कामदेवनाम

सप्तदश२ बलुरामस्य

पाणिः कालिंदीभेदनो बलः २५ मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः कंदर्पो दर्पको नंगः कामः पंचशरः स्मरः २६ शंबरारिर्मनसिजः कुसुमेषुरनन्यजः पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः मनोभवो मनोभेदी मीनांको मीनलांछनः ब्रह्मसूर्झषकेतुः स्याद निरुद्ध उषापतिः २८ लक्ष्मीः पद्मालया पद्मा

अरविंदम शोकं च चूतं च नव मल्लिका ॥ नीलोत्पलं च पंचैते पंचबाणस्य सायकाः

लक्ष्मीनाम

ऋष्यकेतुः विश्वकेतुः ऋषकेतुः ऋष्यकेतुः

10

अ॰ को॰ कमलाश्रीर्हरिप्रिया इंदिरालोकमातामाक्षीराब्धितनया रमा॥
५ सीतालसागोमतीनाचविष्णोःस्थलवासिनी पिलपिलापयस्र
स्ताभार्गवीविष्णुवल्लभा॥३२ शंखोलक्ष्मीपतेःपांचजन्यश्चक्रं॥ ॐ मुरारे ला श्रीवत्सा
सुदर्शनं॥कौमोदकीगदाखड्गोनंदकःकौस्तुभोमणिः३०॥गरू छनंश्य तं ला
गरुडना॰
त्मान्गरुडस्ताक्ष्योवैनतेयःखगेश्वरः नागांतकोविष्णुरथः

५ अश्वाश्वशेब्यसुग्रीव
मेघपुष्पवलाहकाः॥
सारथिर्दारुकोमंत्री
त्युद्धवोवनजोगाजः१

६ ॥

सुपर्णः पन्नगाशनः ३०॥ महादेवनाम॰ शंभुरीशः पशुपतिः शिवः
शूलीमहेश्वरः ईश्वरः शर्वईशानः शंकरश्चंद्रशेखरः ३१ भू
तेशः खंडपरशुर्गिरीशोगिरिशोमृडः मृत्युंजयः कृत्तिवासाः
पिनाकीप्रमथाधिपः ३२ उग्रः कपर्दीश्रीकंठः शितिकंठः क
पालभृत् वामदेवोमहादेवोविरूपाक्षस्त्रिलोचनः ३३ कृ
शानुरेताः सर्वज्ञोधूर्जटीनीललोहितः हरःस्मरहरोभर्गस्त्र्यं

12

६

श्र·को· चक्र। त्रिपुरांतकः ३४ गंगाधरोंधकरिपुः क्रतुध्वंसीवृषध्व
जः ३५ व्योमकेशोभवोभीमः स्थाणूरुद्र उमापतिः ३८ शिवज
टाजूटनाम· कपर्दोस्यजटाजूटः ३६ शिवधनुषनाम· पिना
कोजगवंधनुः ३७ शिवपार्षदनाम· प्रमथाः स्युः पारिष
दाः· सप्तमातृनाम· ब्राह्मीत्याद्यास्तु मातरः ३८ ब्राह्मीमाहेश्व राम
रीचैवकौमारीवैष्णवीतथा ३९ वाराहीचैवमाहेंद्रीचा ६

अहिर्बुध्न्योष्टमूर्तिश्च गजारिश्च महानटः॥

13

मृडासनमानरः ऐश्वर्यनाम· विभूतिर्भूतिरैश्वर्यं स्त्र
ष्टाविभूतिनाम· मणिमादिकमष्ठधा । अणिमामहिमा
चैवगरिमालघिमातथा प्राप्तिःप्राकाम्यमीशित्वंवशित्वं
चाष्टमस्तथः पार्वतीनाम· उमाकात्यायनीगोरीकाली
हैमवतीश्वरी शिवाभवानीरुद्राणीशर्वाणीसर्वमंगला
अपर्णापार्वतीदुर्गामृडानीचंडिकांबिका आर्यादा ॥

अ॰ को॰ ८

क्षाग्रणीश्चैव गिरिजामेनकात्मजा ॥ गणेशनाम॰ विनायको विघ्नराज द्वैमातुर गणाधिपाः ॥ अप्येकदंत हेरंब लंबोदर गजाननाः ॥ वक्रतुंडः शूर्पकर्णो गौरीमल समुद्भवः ॥ कार्त्तिकेयनाम॰ कार्त्तिकेयो महासेन शरजन्मा षडाननः ॥ ४१ ॥ पार्वतीनंदनः स्कंदः सेनानीरग्निभूर्गुहः ॥ बाहुलेयस्तारकजित् विशाखः शिखिवाहनः ॥ ४२ ॥ षाण्मातुरः शक्तिधरः कुमारः क्रौंचदा

नाम॰ ८

14

कृशाः गरा शिरोब नाम: भृंगी भृंगिरि टिस्तुंडी नं दीगणनाम
नंदि को नंदि केश्वरः ४२ इंद्रनाम॰ इंद्रो मरुत्वान्मघवा विडौ
जाः पाकशासनः वृद्धश्रवाः सुनाशीरः पुरुहूतः पुरंदरः ४३ जि
ष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः सुत्रामा गोत्रभिद्व
ज्री वासवो वृत्रहा वृषा ४४ वास्तोष्पतिः सुरपतिर्वलारातिः
शचीपतिः जंभभेदी हरिहयः स्वाराँनमुचिसूदनः पुर्दसंक्रंद

सुनासीरः
सुनाशीरः

अ·को· नोदुश्चवनस्तुराषाण्मेघवाहनः आखंडलः सहस्राक्षो ऋभुक्षा ३४ ३५ 16

८ इंद्राणीनामस्तस्यतुप्रिया ४० पुलोमजाशचींद्राणी नगरीनाम

नगरीत्वमरावती १ इंद्रअश्वनाम· हयउच्चैःश्रवाः १ सारथीनाम·सु

तोमातलि १ इंद्रवनोनाम नंदनंवनं ४८ इंद्रमहलनाम· स्यात्प्रा

सादोवैजयंतो १ इंद्रपुत्रनाम·जयंतःपाकशासनिः २ इंद्रहस्तीनाम· राम

ऐरावतोभ्रमातंगैरावणाभ्रमुवल्लभाः ४ ४९ वज्रनाम· ह्रादिनीवज्रम ८

स्त्री १

सांनोपि नालव्याख्या/पदत्याख्य संवत्सरपांसुनामूम्भानि
वेदो

स्त्रीस्यात्कुलिशंभिदुरंपविः शतकोटिःस्वरुःशंबोदंभोलिरशनिर्द्व

योः॥ ५९ इंद्रविमाननाम॰ व्योमयानंविमानोस्त्री॰ नारदादिऋषिना

म॰ नारदाद्याःसुरर्षयः इंद्रसभानाम॰ स्यात्सुधर्मादेवसभा अमृ

तनाम॰ पीयूषममृतंसुधा ५९ स्वर्गाकाशगंगानाम॰ मंदाकिनीवि

यद्गंगास्वर्णदीसुरदीर्घिका॥ सुमेरुपर्वतनाम॰ मेरुःसुमेरुर्हेमाद्री

रत्नसानुःसुरालयः ५२ देववृक्षनाम॰ पंचैतेदेवतरवो मंदारःपारिजा

17

अ॰ को॰

९

तकः संतानः कल्पवृक्षः पुंसि वा हरिचंदनं ५ सनत्कुमारना

म॰ सनत्कुमारो वैधात्रः अश्विनीकुमारनाम॰ स्वर्वैद्यावश्विनी

सुतौ नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ५ उर्वसी

नाम॰ स्त्रियां बहुष्वप्सरसः स्वर्वैश्या उर्वशीमुखाः घृताचीमेन

कारंभा हरशी च तिलोत्तमा : प्रियंवदा मंजुकेशी संज्ञेना देवना राम॰

यका: गंधर्वनाम॰ चित्रांगदश्चित्ररथ प्रियंवद सुदर्शनौ १९

९

18

19

ता हाहा हूहूश्चैवमाद्या गंधर्वास्त्रिदिवौकसां ॥ ५५ अग्निर्नाम ॥ अग्नि

वैश्वानरो वह्निर्वीतिहोत्रो धनंजयः ॥ कृपीटयोनिर्ज्वलनो जा

तवेदास्तनूनपात् ॥ ५६ बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः

शोचिष्के शः = ३

॥ आश्रयाशो बृहद्भानुः कृशानुः पावकोनलः ॥ रोहिताश्वो वा

युसखः शिखावानाशुशुक्षणिः ॥ ५७ हिरण्यरेता हुतभुग्दहनो

हव्यवाहनः ॥ ५८ सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः ॥ शुचि

श्र॰को॰ रश्मिनमोर्वस्त्व बडवाग्निनाम॰ वाडवोवडवानलः ज्वालानाम॰ वन्हे
२० र्द्वयोर्ज्वालकीलावर्चिर्हेतिःशिखास्त्रियां अग्निकणानाम त्रिषु
स्फुलिंगोग्निकणः आंचनाम॰ संतापः संज्वरः समौ निर्गतज्वाला
नाम॰ उल्कास्यान्निर्गतज्वालो भस्मनाम॰ भूतिर्भवतिभस्मनी
क्षारोरक्षाच दावाग्निनाम॰ दावस्तुदवोवनहुताशने यमनाम
॥ धर्मराजः पितृपतिः समवर्तीपरेतराट् कृतांतोयमुनाभ्राता

शमनो यमराड्यमः कालो दंडधरः श्राद्धदेवो वैवस्वतोंतकः राक्ष
सनाम· राक्षसः कौणपः क्रव्यात्क्रव्यादोस्रप आशरः रात्रिंचरो रात्रि
चरः कर्बुरो निकषात्मजः यातुधानः पुण्यजनो नैरृतो यातुरा
क्षसी वरुणनाम· प्रचेता वरुणः पाशी यादसांपतिरप्पतिः वा
युनाम· श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः पृषदश्वो गंध
वहो गंधवाहानिलाशुगाः समीरमारुतमरुज्जगत्प्राणसमीर

२० प्रकंपनो मुहाबानोऽकंम्नाबातस्तस्वद्व विक:६६

६५

अ.को. रीः २ १ रागा नभस्वद्वातपवनपवमानःप्रभंजनाः ७३ प्राणोऽपानः समानश्चोदानव्यानौ च वायवः हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ७४ उदानः कंठदेशस्थो व्यानः सर्वशरीरगः १ शरीरस्था इमे वेगनाम. रंहस्तरसी तु रयः स्यदः ७५ जवो. शीघ्रनाम. शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतं सत्वरं चपलं तूर्णमविलंबितमाशु च ७६ निरंतरनाम. सततानारताश्रांतसंततविरतानिशं.

११

राम.

११

नित्यानवरताजस्रमप्यं॰ अतिशयनाम॰ थातिशयोभर: ६९ अति
वेलभृशात्यर्थातिमात्रोद्गाढनिर्भरं तीव्रैकांतनितांतानि गा
ढबाढदृढानि च ७० क्लीबेशीघ्राद्यऽसत्वे स्यात् त्रिष्वेषामेकगा
मियत् कुबेरनाम॰ कुबेरस्त्र्यंबकसखोयक्षराड् गुह्यकेश्वर: ७१
मनुष्यधर्माधनदोराजराजोधनाधिप: किन्नरेशोवैश्रवण:
पौलस्त्योनरवाहन: ७२ यक्षैकपिंगैलविलश्रीदपुण्यजनेश्व

अ.को. १२

रः॥ कुबेरवननाम॥ अस्योद्यानंचैत्ररथं॥ कुबेरपुत्रनाम॥ पुत्रस्तुनलकूव
रः॥७३॥ कुबेरस्थाननाम॥ कैलाशःस्थानं॥ कुबेरपुरीनाम॥ मलकापुः॥ कुबे
रविमाननाम॥ विमानंतुपुष्पकं॥ किन्नरनाम॥ स्यात्किन्नरःकिंपुरुषस्तु
रंगवदनोमयुः॥७४॥ निधिनाम॥ निधिर्नाशेवधिर्भेदाः॥ पद्मशंखादयोनि
धेः॥ महानिधिनाम॥ महापद्मश्चपद्मश्चशंखोमकरकच्छपौ॥ मुकुंद॥ राम
कुंदनीलाश्चखर्वश्चनिधयोनव॥ घंटानादःपार्श्वमौलिःकुबेरस्यच १२

कुबेरमंत्रीनाम॥

वर

मंत्रिरोगा ॥ इति स्वर्गवर्गः १ आकाशनाम. द्योदिवौ द्वे स्त्रियामभ्रं व्यो
म पुष्करमंबरं नभोंतरिक्षं गगनमनंतं सुरवर्त्म खं १ वियद्विष्णुपदं वा तु
पुंस्याकाशविहायसी विहायसोपि नाकोपि द्युरपि स्यात्तदव्ययं २ ता
च= रापथोंतरिक्षं च मेघाध्वा च महाबिलं ॥ द्यावापृथिव्यौ रोदस्यौ रोदसी क्र
हरं मनं १ इति व्योमवर्गः २ दिशानाम. दिशस्तु ककुभः काष्ठा आशा
श्च हरितश्च ताः प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः १ उत्त

एकैकम् दि ग्म न अवाग्भवमवाचीनमुदीचीनमुदग्भवम्॰ प्रत्यग्भवं प्रतीचीनं प्राचीनं प्राग्भवं त्रिषु ॥१॥

अ॰को॰ । रादिशुदीचीस्यादिशिभवनाम॰ दिश्यंतुत्रिषुदिग्भवे॥ दिक्पालनाम॰

२२ इंद्रोवह्निःपितृपतिर्नैर्ऋतोवरुणोमरुत् २ कुबेरईशःपतयःपू 26

र्वादीनांदिशांक्रमात्॥ दिग्गजनाम॰ ऐरावतःपुंडरीकोवामनः

कुमुदोंजनः ३ पुष्पदंतःसार्वभौमःसुप्रतीकश्चदिग्गजाः॥ दि

ग्गजीनाम॰ करिण्योऽभ्रमुकपिलापिंगलानुपमाःक्रमात् ताम्र

४ ताम्रपर्णीशुभ्रदंतीचांगनाचांजनावती॥ विदिशानाम॰ ॥ २॥

रविः शुक्रो महीसूनुः स्वर्भानुर्भानुजो विधुः॰ बुधो बृहस्पतिश्चेति दिशां चैव तथा ग्रहाः॰ १

कौबेर्यं त्वपदिशं दिशो र्मध्येविदिक्स्त्रियां ५ मध्यमात्रनाम.

अभ्यंतरंत्वंतरालं.मंडलनाम. चक्रवालंतुमंडलं मेघनाम.

अभ्रंमेघोवारिवाहःस्तनयित्नुर्बलाहकः ६ धाराधरोजलधरः

तडित्वान्वारिदोंबुभृत् घनजीमूतमुदिरजलमुग्धूमयोन

यः ७ मेघपंक्तीनाम. कादंबिनीमेघमाला मेघभवनाम.त्रिषु

मेघभवेभ्रियं मेघशब्दनाम. स्तनितंगर्जितंमेघनिर्घोषेरसि

27

अ॰को॰ नादिंच विजलीनाम॰ शंपाशतह्रदाह्रादिन्यैरावत्यः क्षणप्रभा
२८ तडित्सौदामिनीविद्युच्चंचलाचपलाअपिच वज्रशब्दनाम॰
स्फूर्जथुर्वज्रनिर्घोषो॰ वज्राग्निनाम॰ मेघज्योतिरिरंमदः
इंद्रधनुषनाम॰ इंद्रायुधंशक्रधनुस्तदेवऋजुरोहितं १० वृ
ष्टिनाम॰ वृष्टिर्वर्षं वृष्टिघातनाम॰ तद्विघातेवग्राहावग्र^ राम॰
होसमौ महावृष्टिनाम धारासंपातआसारः जलकणना २८
वि२

म॰ शीकरोंऽबुकणाः स्मृताः ११ ओलेनाम॰ वर्षोपलास्तु करका॰ मेघा
च्छादिनादिननाम॰ मेघच्छन्नेह्नि दुर्दिनं ॥ आच्छादननाम ॥ अंतर्द्धा व्यव
धा पुंसि त्वंतर्द्धिरपवारणं १२ अपिधानतिरोधानपिधानाच्छाद
नानि च ॥ चंद्रमानाम॰ हिमांशुश्चंद्रमाश्चंद्र इंदुः कुमुदबांधवः॥ वि १३
धुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः अब्जो जैवातृकः सोमो सोमा॰
ग्लौर्मृगांकः कलानिधिः १४ द्विजराजः शशधरो नक्षत्रेशः क्ष^

अ० को०

पाकरः २० अत्रेयो नाखधाख्तिराजा २ सोरोहिणीप्रियः ॥ चं

द्रकलानाम. कलानुषोडशोभागो रविचंद्रमंडलनाम. बिंबो

स्त्रीमंडलं त्रिषु १५ रवंडमात्रनाम. भिन्नशाकलखंडेवा समरवंड

नाम. पुंस्यर्द्धोर्द्धं समेंशके १६ चांदनीनाम. चंद्रिकाकौमुदी

ज्योत्स्ना. निर्मलतानाम. प्रसादस्तुप्रसन्नता २ चिन्हनाम. कलं

कांकौलांछनंचचिन्हं लक्ष्मचलक्षणं १८ शोभानाम. सुषमा

राम. २५

२५

30

समद्दिमस्य

परमा शोभा शोभा कांतिर्द्युतिश्छविः॥१७॥ कुहलनाम· अवश्यायस्तु नी
हारः हिमनाम· स्तुषारस्तुहिनं हिमं॥ प्रालेयं मिहिका चाथ· हिमस
मूहनाम· ऽथ हिमानी हिमसंहतिः॥१८॥ शीतनाम· शीतं गुणे· शीत
वान्नाम· तद्वदर्थाः सुषीमः शिशिरो जडः॥ तुषारः शीतल
शीतो हिमः सप्तान्यलिंगकाः॥१९॥ ध्रुवनाम· ध्रुव औत्तानपादिः स्या
अगस्त्यनाम· दगस्त्यः कुंभसंभवः मैत्रावरुणिः· अगस्त्यपत्नी

शीत
तद्वान् गुण
वाच्यधीयेयांजे ३

तुषारहिमशीतश्च शब्दा न ह ठलक्षणाया
[illegible] तद्भयत्र पतिता: ३

अ॰को॰ नाम॰ रेवत्योः पौष्णमनुराधा मैत्र धर्मि[20] वरणी॰ नक्षत्रनाम॰ नक्षत्रमृक्षंभंतारा

२६ तारकाप्युडुवास्त्रियां २२ दाक्षायण्योऽश्विनीत्यादि स्तारा

अश्विनीनाम॰ अश्वयुगश्विनी॰ विशाखानाम॰ राधाविशाखा

पुष्यनाम पुष्ये तु सिध्यतिष्यौ धनिष्ठानाम॰ श्रविष्ठया॰ २३ स॰

माधनिष्ठा स्युः पूर्वोत्तरभाद्रपदानाम॰ प्रोष्ठपदाभाद्रपदाः स्त्रियः[22] नाम॰

मृगशीरनाम॰ मृगशीर्षं मृगशिरस्तस्मिन्नेवाग्रहायणी २४ २६

पूर्वप्रोष्ठपदे द्वे उत्तरेच एवं च तुः संख्याक त्वाद्बहुवचनम

33

मृगशिरस्य नारानाम· इल्वला[१]स्तच्छिरोदेशे नारकानिवसंतिया: २३

बृहस्पतिनाम· बृहस्पति: सुराचार्यो जीवस्तिर्धिषणो गुरु: २४ जी

वश्चांगिरसो वाचस्पतिश्चित्रशिखंडिजः[२४] शुक्रनाम· शुक्रो दैत्य

गुरु: काव्य उशना भार्गव: कवि: [६] २६ मंगलनाम· अंगारक: कुजो

भौमो लोहितांगो महीसुत: [५][२५] बुधनाम· रौहिणेयो बुध: सौम्य: [२] श ^

निश्चरनाम· समौ सौरि शनैश्चरो [२] २८ शनिर्मंद: पंगुकालो छा ^

मरीचिरंगिरा अत्रिः पुलस्त्यः पुलहः क्रतुः
वसिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखंडिनः॥१

अ·को
२६

यापुत्रोर्कनंदनः राहुनाम· तमस्तु राहुः स्वर्भानुः सैंहकेयो विधुंतुदः॥५
२६ सप्तर्षिनाम· सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखंडिनः॥ लग्नना
म· राशीनामुदयो लग्नं ते तु मेषवृषादयः २७ मेषो वृषो मिथुनं कर्क
टः सिंह कन्यके तुला वृश्चिको धन्वी मकरः कुंभमीनको॥१ सूर्य
नाम· सूरसूर्यार्यमादित्य द्वादशात्म दिवाकराः भास्कराहस्कर ब्र
प्रभाकर विभाकराः २८ भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्म

राम·
२७

34

लोकबंधुः

यः विकर्त्तनार्कमार्त्तण्डमिहिरारुणपूषणः ॥ द्युमणिस्तरणिर्मित्रश्चित्रभा
नुर्विरोचनः कर्मसाक्षी जगच्चक्षुरंशुमाली त्रयीतनुः ॥ विभावसुर्ग्रहप
पतिस्त्विषांपतिरहर्पतिः भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ॥ प्रद्योत
नो दिनमणिः खद्योतो लोकबांधवः इनो भगो धामनिधिश्चांशुमाल्य
ब्जिनीपतिः ॥ सूर्यपारिषदनाम माठरः पिंगलो दंडश्चंडांशोः पारिपार्श्व
काः सूर्यसारथिनाम सूर्यसूतोरुणोनूरुः काश्यपिर्गरुडाग्रजः ॥ परि

परितः पार्श्वे विद्यमानाः

36

अ.को. वेषनाम. परिवेषस्तु परिधिरुपसूर्यकमंडले. किरणनाम. किरणोऽस्र
१८ खं मयूखांशुगभस्तिघृणिरश्मयः भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः
स्त्रियां. प्रभानाम. स्युः प्रभारुग्रुचिस्त्विड्भा द्युतिदीप्तयः भाश्छ
रोचिः शोचिरुभे क्लीबे. घर्मनाम. प्रकाशो द्योत आतपः. ईषदुष्णनाम
कोष्णं कवोष्णं मंदोष्णं कदुष्णं त्रिषु तद्वति. उष्णनाम. तिग्मं तीक्ष्णं
खरं तद्वत्. ने॰ सेक नवनि फलिन किरणनाम मन्ऋग नत्सामरीचिका

विं
राम.
१८

समयो ४

स्वर्गः कालनाम० कालो दिष्टोप्यनेहापि० इति पदानाम० पक्षयपक्षतिः प्रतिपद्वे इमे स्त्रीत्वे० इति पदाद्दिनतिथिनाम० तदाद्यास्तिथयो द्वयोः २ दिननाम० घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ० प्रातःकालनाम० प्रत्यूषोहर्मुखं कल्यमुषः प्रत्युषसी अपि २ प्रभातं च० सायंकालनाम० दिनांते तु सायं संध्यापितृप्रसूः त्रिसंध्यानाम० प्राह्णापराह्णमध्याह्नास्त्रिसंध्य० रात्रिनाम० मथ शर्वरी २ निशानिशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा ८

व्युष्टं प्रभातं द्वे क्लीवे पुंसि गोसर्गउच्यते,

इ

काल्यं

37

अथ यामिनीनाम

अ·को· विभावरीतमस्विन्यौ रजनी यामिनीतमी छनमिस्वानामसीराजी·चां
१९ दनीरात्रिनाम·ज्योत्स्नीचंद्रिकयान्विता·द्वादशप्रहरकालनाम·आ
गामिवर्तमानाहर्युक्तायां निशिपक्षिणी पनेघाविनाम·दिवसोरा
त्रिपुक्तस्तनेपक्षीत्यभिधीयते॥ रात्रिसमूहनाम·गणारात्रंनिशा
वस्युः प्रदोषनाम·प्रदोषोरजनीमुखं·अर्द्धरात्रिनाम·अर्द्धरात्रनिशी रामं·
थोद्वौ·प्रहरनाम·द्वौयामप्रहरोसमौ·पर्वसंधिनाम·सपर्वसंधिःप्रति· १९

च्चरलरंबा

याष्टर्या मा या स्वातिनी वाली यो नरा सा कुहूरिति श्रुतेः चतुर्दश्या अंतिम प्रहरः अमावास्याया अष्ट प्रहरात्मे ति न च प्रहरात्मक त्वं द्वयकालः प्रत्यक्ष सिद्धः तत्राद्य प्रहरद्वये चंद्र स्पर्श त्सा नो अंतिम प्रहर द्वये चंद्र स कूत्स्न त्वय : अतो मावास्याया आद्य प्रहरः सिनी वाली संज्ञः अंत्य प्रहर द्वयं कुहूसंज्ञं मध्यम प्रहर पंचकं दर्श संज्ञं

च

पञ्चदश्योर्यद्वंतरं ॥२१॥ पक्षांतनाम. पक्षांतौ पंचदश्यौ द्वे. दर्शो मा नाम पौर्णमासी तु दर्शो ॥२२॥ सानुमती नाम कलाहीने सानुमतिः राका नाम पूर्णे निशाकरे ॥२३॥ अमावास्या नाम. अमावास्या त्वमावस्या दर्शः सूर्येन्दु संगमः ॥२४॥ अमाभेद नाम. सा दृष्टेन्दुः सिनी वाली सा नष्टेन्दु कला कुहूः ॥२५॥ ग्रहणनाम उपरागो ग्रहो राहुग्रस्ते त्विंदौ च पूष्णि च ॥२६॥ सोपप्लवोपरक्तौ द्वौ. अग्न्युत्पातनाम. वह्न्युत्पात उपाहितः ॥२७॥ एकोनत्या सूर्येंदु नाम. एक

राका

३९

अमावसी अमावासी अमावासी अमामसी ॥ अप्यमावस्यमावासीत्यामामस्यप्यमामसीति शब्दार्णवः ॥

कुहूः

मुहूर्तनाम

मिलित्वा एका काष्ठा

अ॰को॰ योन्यापुष्पवंतौ दिवाकरनिशाकरौ॰ काष्ठानाम अष्टादश निमेषास्तु का व॰का॰४

॰२॰ ष्ठात्रिंशत्तु ताः कला॰ क्षणनाम॰ तास्तु त्रिंशत्क्षणस्ते तु मुहूर्तो द्वादशा ५०

स्त्रियां॰ अहोरात्रिनाम॰ ते तु त्रिंशदहोरात्रः॰ पक्षनाम॰ पक्षस्ते दश

पंच च॰ शुक्लकृष्णपक्षनाम॰ पक्षौ पूर्वापरौ शुक्लकृष्णौ॰ मासनाम

मिलितौ मिलितौ

मासस्तु तावुभौ॰ ऋतुनाम॰ द्वौ द्वौ मार्गादिमासौ स्यादृतु॰ अयननाम॰ राम॰

२, तद्विधा सूर्यगतिभेदात् अर्कस्योदग्गतिरुत्तरायणं दक्षिणा गतिस्तु दक्षिणायनं एवं द्वे अयने मिलिते को वत्सर॰ १

स्तैरयनं त्रिभिः॰ वत्सरनाम॰ अयने द्वे गतिरुदग्दक्षिणार्कस्य व २०

समरात्रिंदिवं यस्मिंस्तस्मिन्काले· मीनकन्यासंक्रान्त्योर्दिनरात्रीसमे भवतः। रात्रिं दिवशब्दे चतुर्विचतुरेत्यादि नासाधु:

त्सरः। विषुनाम· समरात्रिंदिवे काले विषुवद्विषुवं च तत्॥१२॥ पौषी पूर्णि

मा नाम पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा, नाम्ना स पौषो माघा

द्याश्चैवमेकादशापरे॥१४॥ मार्गशिरनाम· मार्गशीर्षे सहा मार्गशीर्ष आग्रहा

यणिकश्च सः॥१५॥ पौषनाम· पौषे तैषसहस्यौ द्वौ· माघनाम· तपा माघे·

फाल्गुननाम· ऽथ फाल्गुने॥१६॥ स्यात्तपस्य फाल्गुनिकः स्याच्चैत्रे चैत्रिको चैत्रनाम

को मधुः वैशाखनाम· वैशाखे माधवो राधो· ज्येष्ठनाम· ज्येष्ठे शुक्रः स्या
१७

अ॰को॰ माठनाम॰ शुचिरप्ययं ॥ आषाढे॰ श्रावणनाम॰ श्रावणोनभस्यानभः श्राव

२१ णिकश्चसः॥ भाद्रपदनाम॰ स्युर्नभस्यप्रोष्ठपदभाद्रभाद्रपदाःसमाः॥ आश्वि

ननाम॰ स्यादाश्विन इषोप्याश्वयुजोपि॰ कार्त्तिकनाम॰ स्यात्तुकार्त्तिके १७

बाहुलोर्जौकार्त्तिकको॥ हेमंत ऋतुनाम॰ हेमंतः॥ शिशिरनाम॰ शिशिरोस्त्रि

यां॥ वसंतनाम॰ वसंतः पुष्पसमयः॥ ग्रीष्मनाम॰ सुरभिर्ग्रीष्मऊष्मकः॥ नि राम

दाघउष्णोपगमः उष्णऊष्मागमस्तपः॥ स्त्रियांप्रावृट्स्त्रियांभूम्नि २१

वर्षाऋतुनाम१

वर्षा अयपशरांशिशिरयां षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात् २२ सं
वत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः पितृ अहोरात्रनाम · मासेन स्या
दहोरात्रः पैत्रो · देवतानकी अहोरात्रनाम · वर्षेण दैवतः दैवे युगसहस्रे
द्वे ब्राह्मः कल्पौ तु तौ नृणां मन्वंतरनाम · मन्वंतरं तु दिव्यानां युगानामे
कसप्ततिः प्रलयनाम · संवर्तः प्रलयः कल्पः क्षयः कल्पांत इत्यपि २३
पापनाम · अस्त्री पंकं पुमान्पाप्मा पापं किल्बिषकल्मषं कलुषं वृजि

तत्र कृष्णाष्टम्या उत्तरार्धे दिनारम्भः शुक्लाष्टम्यां उत्तरार्धे रात्र्यारम्भः

तत्रोत्तरायणं दिनं दक्षिणायनं रात्रिः

मानुषाणां यत्कृतादियुगचतुष्टयं तद्दैवं युगं ज्ञेयं एवं द्वे दैवे युगसहस्रे ब्राह्मोऽहोरात्रः अयमर्थः उक्तानां देवताहोरात्राणां षष्ट्य
धिकशतत्रयेण दिव्यं वर्षं दिव्यैर्द्वादशभिर्वर्षसहस्रैर्मानुषं चतुर्युगं तच्च देवानामेकं युगं तत्सहस्रं ब्रह्मणो दिनं तत्प्रमिता नाडिकाल
एतावत्येव रात्रिरेतानां प्रलयकालः मन्वन्तरं तोकल्पा [illegible]

अ.को. नैनोघमंहोदुरितदुष्कृतं ॥ धर्मनाम ॥ स्याद्धर्ममस्त्रियां पुण्य ॥

श्रेयसी सुकृतं वृषः ॥ सुखनाम ॥ मुत्प्रीतिः प्रमदो हर्षः प्रमो ॥

दामोदसंमदाः ॥ २४ ॥ स्यादानंदथुरानंदः शर्मशातसुखानि च ॥

कल्याणनाम ॥ श्वःश्रेयसं शिवं भद्रं कल्याणं मंगलं शुभं ॥ २५ ॥

भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियां ॥ पापपुण्यसुखनाम ॥

म शस्तं चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च ॥ २६ ॥ प्रशस्त ॥

पापपुण्यशब्दौ तथा सुखादिशब्दाः श्वःश्रेयसशिवभद्रादयः एतत्पर्यंताः क्षेमशस्तं च क्लीबपुंसोः

द्रव्ये त्रिषु विशेष्यलिंगाः स्युः यथा पापा स्त्री पापः पुमान् पापं कुलमिति

एते तु पंच नित्यं द्रव्ये एव लिंगांतरेण सामानाधिकरण्येपि स्वलिंगं न जहति। प्रशंसावचने च इति कर्मधारयपर्याय्यव्यभ्राद्विवत् नित्यसमासः। यथा। प्रशस्तो ब्राह्मणो ब्राह्मणमतल्लिका प्रशस्ता गौ गोमचर्चिका गोप्रकांडं। ब्राह्मणोद्धः कुमारीतल्लजः।२

वाचकोकेनाम· मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ[५]

प्रशस्तवाचकान्यमून्ययः[२] शुभावहो विधिः २७ कारणनाम

यदादिकारणं तन्निदानं एकमुपादानं कारणम् २८

हेतुर्नाकारणं बीजं निदानं त्वादिकारणं· क्षेत्रज्ञआत्मापुरुषनाम

त्रयं शरीराधिदैवतस्य   देहत्वादिगुणानां साम्यावस्था या

क्षेत्रज्ञ आत्मा पुरुषः[३]· प्रकृतिनाम· प्रधानं प्रकृतिः स्त्रियां २८

यः कालिको विशेषः कालकृतो देहादेर्विषयः यौवनादिरवस्था ...

अवस्थानाम विशेषः कालिकोवस्था गुणकेनाम गु-

एते त्रयः प्रकृतेर्धर्माः ३ जोत्पत्त्यंतं   सांतं

णाः सत्त्वं रजस्तमः[२९] उत्पत्तिनाम· जनुर्जननजन्मानि ज-

शुभोत्पादकं दैवं सोऽय उच्यते, अयो ऽकारांतः पुं लि, एकम् १२

नियतिः स्त्री

बरकं प्राक्तनकर्मणः

दैवं दिष्टं भागधेयं भाग्यं स्त्री नियति विधिः

45

अ०को० २३

निरूम्यति रूढ्वा: आशिायोकेनाम॰ आशीन्तुचेतनोज्ञन्मीजंतु जन्तु शरीरिणः जातिनाम॰ जातिर्जातं च सामान्यं व्यक्तिना म॰ व्यक्तिस्तु पृथगात्मता चित्तनाम चित्तं तु चेतो हृदयं स्वांतं हृन्मानसं मनः इति कालवर्गः ४ बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्ति चेतनाः १ धीर्धारणावती मेधा॰ संकल्पनाम॰ संकल्पः कर्ममा

जातिरित्या दिपद्यं के चित्स्वपठं ति॰ प्रति टीकाकारे णलिखितं परं रामाश्रमूल एवैतत्पदं दृश्यते

१ समाधानस्य

अवधानं समाधानं प्रणिधानं तथैव च ॥

नसः चिंतानाम. चिंताभोगो मनस्कारश्चर्चा संख्या विचार

णा. [illegible] अध्याहारस्तर्क ऊहो विचिकित्सा तु संशयः

[illegible]नाम. संदेहद्वापरौ चाथ समौ निर्णय निश्चयौ असत्यबु

द्धिनाम मिथ्यादृष्टिर्नास्तिकता परद्रोहनाम व्यापादो द्रोह.

चिंतनं सिद्धांतनाम. समौ सिद्धांतराद्धांतौ भ्रांतिनाम भ्रांति

मिथ्यामतिर्भ्रमः ४ प्रतिज्ञानाम संविदागूः प्रतिज्ञानं नियमा

[illegible]

१० अंगीकाराभ्युपगमप्रतिश्रवसमाधयः ५ | मोक्षविषये धीर्ज्ञानं मोक्षादन्यत्र शास्त्रे शिल्पे च धीर्विज्ञानम् विज्ञानं कर्मणि ज्ञाने इति हैम:

48

अ. को. २४

अवसंभवाः बुद्धिरन्यनाम मोक्षे धीर्ज्ञानमन्यत्र शिल्पज्ञाननाम. विज्ञानं शिल्पशास्त्रयोः मोक्षनाम. मुक्तिः कैवल्यनिर्वाण॰ श्रेयोनिश्श्रेयसामृतं मोक्षोपवर्गो अज्ञाननाम. ऽथाज्ञानमविद्याहंमतिः स्त्रियां ॥ पंचविषयोकेनाम रूपं शब्दो गंधरसस्पर्शा

विषयांतं

श्च विषया अमी गोचरा इंद्रियार्थाश्च हृषीकं विषयींद्रियं ७ इं॰ नाम. द्रियोकेनाम कर्मेंद्रीनाम कर्मेंद्रियं तु पाय्वादि ज्ञानेंद्रीनाम॰ २४

आदिना वागादि तद्यथा, पायूपस्थं पाणिपादौ वाक्चेतीन्द्रियसंग्रहः ॥ उत्सर्गानंदादानगत्यालापाः स्तत्क्रिया ५०

आदिनाथोत्रादि॰ मनः कर्णेन्द्रियानि नं सनात नासह ॥ नासिका चेति षट्चानिंधी द्रियाणि मचक्षते ॥

मनो नेत्रादि धींद्रियं ८ षट्रसनाम तुवरस्तु कषायोऽस्त्री मधुरो लवणः
कटुः ॥ तिक्तो म्लश्च रसाः पुंसि तद्वत्सु षडमी त्रिषु ॥ परिमलनाम॰ वि
मर्दोत्थे परिमलो गंधे जनमनोहरे ॥ आमोदः सोतिनिर्हारी वाच्यलिं
गत्वमागुणात् ॥ हरगामी गंधनाम॰ समाकर्षी तु निर्हारी सुरभिगं
धनाम सुरभिर्घ्राणतर्पणः ॥ सुगंधिनाम॰ इष्टगंधः सुगंधिः स्या
दामोदी मुखवासनः दुर्गंधनाम पूतिगंधस्तु दुर्गंधो विस्रं स्यादा

40

अ॰को॰ मगंधियत्नं शुक्लनाम॰ शुक्लः शुभ्रः शुचिः श्वेतविशदःश्येतपांडुराः अ
२५ वदातःसितोगौरोवलक्षोधवलोर्जुनः १२ पीतशाकलितनामनाम॰ हरि
णःपांडुरःपांडुरीषमांडुल्लधूसरः कृष्णनाम कृष्णेनीलाऽसितःश्याम
कालःश्यामलमेचकाः१३ पीतोगौरोहरिद्राभःपलाशोहरितोहरित १
क्तनाम॰ रोहितोलोहितोरक्तःशोणःकोकनदःछविः अरुणनाम॰ अव्य राम॰
क्तरागस्त्वरुणः पाटलनाम श्वेतरक्तस्तुपाटलः धूम्रवर्णनाम॰ श्यावःस्या २५

हरितनाम॰

न्के पिशो धूम्रधूमलौ कृष्णलोहिते २५ कडारः कपिशः पिंजपिशंगौ कद्रु
पिंगलौ नानावर्णनाम· चित्रंकिर्मीरकल्माषशबलैताश्च कर्बुरे· २६ गु
णेशुक्लादयः पुंसि गुणिलिंगास्तु तद्वति रक्तवर्णनाम· रोहिणी रोहिता
रक्ता लोहिनी लोहिता च सा कोपाइननाम· लोहिनीका रोहिणीका शशा
न्कोपादिनापिवा· हरितनाम सारंगी सारंगा स्वान्यि शंगी पिंजला हरिणी पीतनाम·
त्विषं हरिणेनी स्यान्नेवसेनी सेना सिना च सा नीलीविवक्षेवानाम्नी।

अ॰को॰ नीलीप्राणीनिचोबधौ १८ इति धीवर्गः अथ शब्दादिवर्गः सरस्वतीना 52

२८ म॰ब्राह्मीतुभारतीभाषा गीर्वाग्वाणीसरस्वती व्याहारउक्तिर्लपितं

भाषितंवचनंवचः १ अपभ्रंशशब्दनाम॰ अपभ्रंशोपशब्दस्याच्छास्त्रे

वा॰४ शब्दस्तुवाचकः महाराष्ट्रोद्भवांगींप्रकृष्टांप्राकृतंविदुः २ सूराष्ट्रदे

शेचोत्पन्नासौरसेनीनिकथ्यते मागधीमगधेजाताचूलिकाचोल राम

देशजा ३ पैशाचीसिद्धभाषास्यात्संस्कृतंदेवभाषितं॰वाक्यनाम॰। २८

निङ्·स्वंतवतोगाढं·क्रियानाम·क्रियावाकारकान्विता वेदनाम·श्रु
तिस्त्री वेदआम्नायस्त्रयीधर्मस्तुतद्विधिः वेदत्रयनाम· स्त्रियामृक्साम
यजुषी इतिवेदास्त्रयस्त्रयी ५ वेदषडंगनाम· शिक्षेत्यादिश्रुतेरंगमों
कारःप्रणवौसमौ· इतिहासनाम· इतिहासपुरावृत्तमुदात्ताद्यास्त्रयः
स्वराः उदात्तश्चानुदात्तश्चस्वरितश्चेतिवैदिकाः आन्वीक्षिकीदंडनी^
तिस्तर्कविद्यार्थशास्त्रयोः ७ आख्यायिकोपलब्धार्थापुराणंपंचल^

पुराणना·

अ.को. क्षराणं सर्गश्च प्रतिसर्गश्च वंशोमन्वंतराणिच ८ वंशानुचरितंचेति
२० पुराणंपंचलक्षणं सूत्रलक्षणानाम. स्वल्याक्षरमसंदिग्धंसारवद्विश्व
तोमुखं ९ सूत्रस्यलक्षणंचेतदनुमानंसहेतुकं उक्तानुक्तद्विरुक्तानां
विचारश्चनिबंधनं १० हेतुभिश्चप्रमाणेश्चभाष्यंभाष्यविदोविदुः कं
थानाम. प्रबंधकल्पनाकथा. द्विविज्ञाचार्यप्रश्नानाम. प्रवाल्हिकाप्र राम.
हेलिकास्मृतिस्तुधर्मसंहिता समाहृतिस्तुसंग्रहः लोकापवादनाम. स २०

54

मस्यान्तसमासार्थ किंवदंनिजनक्षतिः रूनानानाम॰ वार्ताप्रवृत्तिवृत्तांत
उदंतः स्यान्नेयात्रय: आख्याल्हे रमिधानंचनामधेयंचनामच १२ आहू
तिनाम॰ हूनिराकारणाव्हाने वचांसिनाम॰ संहूतिर्बहुभिःकृता: विवाद
नाम विवादोव्यवहारस्या॰ वचनोपक्रमनाम॰ उपन्यासस्तुवाङ्मुखं॰ व
दृशाख्यनाम॰ शिक्षाकल्पोव्याकरणंनिरुक्तंछंदएव ज्योतिषंचषडं व २
गानिकथितानिमनीषिभिः१४ तर्कनाम॰ छलजात्यादिभेदेनयद्

अ॰को॰ कंतर्क उद्घाने उदाहरणनाम॰ उपोद्घात उदाहारः शपनं शपथः पुमान् १५७

२८ लकेनाम॰ प्रश्नानुयोगः पृच्छा च प्रतिवाक्योत्तरे समे मिथ्यावादनाम॰ मि

थ्याभियोगोभ्याख्यानमथमिथ्याभिशंसनं २८ अभिशापः प्रणादस्तु श

ब्दः स्यादनुरागजः यशनाम॰ यशः कीर्तिसमज्ञा च स्तोत्रनाम॰ स्तवस्तोत्रं

स्तुतिर्नुतिः उच्चरितशब्दनाम॰ आम्रेडितं द्विस्त्रिरुक्तं॰ घोषणानाम॰ उ॰ राम

च्चैर्घुष्टं तु घोषणा शोकभीत्यादिविकृतनाम॰ काकुः स्त्रियां विकारोय २८

यो क्षमीत्यादिभिर्द्वे निंदानाम. अपवर्णाक्षेपनिर्वादपरिवादापवादवत्
उपक्रोशोजुगुप्साचकुत्सानिंदाचगर्हणे १० अप्रियवचननाम. पारुष्य
मतिवादस्या. अपकारार्थवचननाम भर्त्सनंत्वपकारगी. निंदावचनना
म. यःसनिंदउपालंभस्तत्रस्यात्परिभाषणं. मैथुनार्थवचननाम. तत्रत्वा
क्षारणायस्यादाक्रोशोमैथुनंप्रति सम्यग्भाषणनाम. स्यादाभाषणमाला
पः अनर्थकवचननाम प्रलापोनर्थकंवचः वारंवारवचननाम. अनुलापोमु

न९

58

अ·को·

२८

र्भाषा·विलापनाम·विलापः परिदेवनं विरोधनाम·विप्रलापो
विरोधोक्तिः अन्योन्यभाषणनाम· संलापो भाषणं मिथः शोभ
नवचननाम· सुप्रलापः सुवचनं कठोरतानाम मपलापस्तु
निह्नवः संदेहनाम· संदेह वाग्वाचिकं स्याद्वाग्भेदास्तु विस्तृन
रे· अनादरनाम· चोद्यमाक्षेपाभियोगौ· शापनाम शापाक्रोशदुरे
षणा· प्रेमणाश्लाघानाम· अस्त्री चाटु चटुश्लाघा प्रेमणामिथ्याभिक

रान·

२८